Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 3 | ISSN : 2581- 6306

# काशिकाया: चतुर्थाध्यायस्थनिपातनसूत्राणां विशिष्टमध्ययनम्

गोविन्द सोरेन
शोधच्छात्र: ,व्याकरणविभाग:, राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:

**सारांश:** - लघुना उपायेन प्रकृतिप्रत्ययविभागपूर्वकं साधुशब्दज्ञानं व्याकरणाध्ययनस्य परमं प्रयोजनमिति सुविदितं वेदितव्यम्। स च उपाय: पाणिनीयं व्याकरणम्। सूत्रात्मक: पाणिने: अष्टाध्यायीग्रन्थ:। पाणिनीये व्याकरणे संज्ञादीनि षड्विधानि सूत्राणि दृश्यन्ते। अभीष्टार्थसिद्ध्यर्थं तत्तत्सूत्रेषु विधिनिषेधरूपनिपातनसूत्राणि रचितानि। तत्र किं नाम निपातनम्? इति जिज्ञासायामुच्यते- यत् "लक्षणं विना एव निपतति प्रवर्तते लक्ष्येषु" तत् निपातनम्। अत: काशिकाया: चतुर्थाध्यायस्थनिपातनसूत्राणां विशिष्टमध्ययनम् इति शीर्षकमाश्रित्य मया शोधलेखोऽयं विलिख्यते।

**विशेषशब्दा:-** संज्ञायां धेनुष्या, परिपन्थं च तिष्ठति, कौपिञ्जलहास्तिपदादण्, पितृव्यमातुलमातामहपितामहा:, छ च, अपोनप्त्रपान्नप्तृभ्यां घ:, कौमारापूर्ववचने, कौशल्यकार्मार्याभ्यां च

## 1. कौशल्यकार्मार्याभ्यां च 4.1.155

कौशल्यश्च कार्मार्यश्च इति द्वन्द्वे कौसल्यकार्मार्यौ, ताभ्यां कौसल्य-कार्मार्याभ्याम् इति पञ्चमीद्विवचनान्तं पदम्। च इति अव्ययम्। अत्र **तस्यापत्यम्** (4.1.9 2) इति सूत्रं, **तिकादिभ्य: फिञ्** (4.1.154) इत्यत: प्रथमैकवचनान्तं फिञ् इति च अनुवर्तते। **प्रत्यय:** (3.1.1) **परश्च** (3.1.2) **आद्युदात्तश्च** (3.1.3) **ङ्याप्प्रातिपदिकात्** ( 4.1.1) **तद्धिता:** (4.1.76) **प्राग्दीव्यतोऽण्** (4.1.83) **समर्थानां प्रथमाद्वा** (4.1.82) इत्येतान्यधिक्रियन्ते।

अनेन सूत्रेण कौशल्यकार्मायाभ्यां शब्दाभ्याम् अपत्येऽर्थे प्राप्तस्य इञोऽपवादत्वेन फिञ्प्रत्ययो निपात्यते। तत: **फिञ्प्रकरणे दगुकोशलकर्मारच्छागवृषाणां युट् च**[1] इति भाष्यवार्तिकवलात् फिञ्प्रत्ययसन्नियोगेन युडपि निपात्यते। तदेव आह वृत्तौ- **प्रत्ययसन्नियोगेन प्रकृतिरूपं निपात्यते**[2] इति।

कोशलस्य युवापत्यम् इति विग्रहे कोसल + ङस् इति स्थिते प्रकृतसूत्रेण फिञ्प्रत्यये प्रकृतेर्युटि निपातितेऽनुबन्धलोपे कोशल + य + ङस् + फि इति स्थिते प्रत्ययादे: फकारस्य आयनादेशे तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि शब्दाधिकारकार्ये कौशल्यायनि: इति सिद्ध्यति।

कर्मारस्य युवापत्यम् इति विग्रहे पूर्ववत्प्रक्रियायां कार्मायायणि: इति सिद्ध्यति।

---

1 अ. सू 4.1.155

2 सि कौ सू.क्र.1179

छागवृषयोरपि इति वार्तिकेन छागवृषयोः शब्दयोः अपत्यार्थे पूर्ववद् फिञ्प्रत्यये प्रकृतेर्युटि च निपातिते छाग्यायनिः वार्ष्यायणिः इति रूपे भवतः।

## 2. कौमारापूर्ववचने 4.2.13

कौमार इति लुप्तप्रथमान्तनिर्देशः। न पूर्वोऽपूर्वः इति नञ्तत्पुरुषसमासः। अपूर्वः इति शब्दः भावार्थबोधकः अस्ति। स च व्याख्यानात् कुमारशब्दवाच्यः, तस्य वचनम् इति अपूर्ववचनम् इति षष्ठीतत्पुरुषसमासः। तथा च अर्थनिर्देशाद् अपूर्ववचनम् इति पदेन पाणिग्रहणं यस्य न भवति स गृह्यते। तस्मिन् अपूर्ववचने इति सप्तम्येकवचनान्तं पदम्। अत्र **प्रत्ययः (3.1.1) परश्च (3.1.2) आद्युदात्तश्च (3.1.3) ङ्याप्प्रातिपदिकात् (4.1.1) तद्धिताः (4.1.76) प्राग्दीव्यतोऽण् (4.1.83) समर्थानां प्रथमाद्वा (4.1.82)** इत्येतान्यधिक्रियन्ते।

अपूर्ववचने कौमारः इति श्ब्दः निपात्यते इति तदर्थः।

**कौमारः पतिः** – अपूर्वपतिं कुमारीं पतिरुपपन्नः इति विग्रहे कुमारी + अम् इति कुमारीशब्दाद् द्वितीयासमर्थादुपयन्तरि प्रकृतसूत्रेण अण्प्रत्यये निपातिते अनुबन्धलोपे तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि आदिवृद्धौ **यस्येति च (6.4.148)** इति ईकारे लोपे शब्दाधिकारकार्ये कौमारः इति सिद्ध्यति। उपयन्ता पतिः इति तदर्थः।

## 3. अपोनप्त्रपान्नप्तृभ्यां घः 4.2.27

अपोनपात् तथा अपान्नपात् इत्येते द्वे देवतयोः नाम्नी। अपोनप्तृ च अपान्नप्तृ च इति इतरेतरयोगद्वन्द्वात् ताभ्यां अपोनप्तृ-अपान्नप्तृभ्याम् इति पञ्चमीद्विवचनान्तं पदम्। घः इति प्रथमैकवचनान्तं पदम्। अत्र **साऽस्य देवता (4.2.24)** इति सूत्रमनुवर्तते। अत्र **प्रत्ययः (3.1.1) परश्च (3.1.2) आद्युदात्तश्च (3.1.3) ङ्याप्प्रातिपदिकात् ( 4.1.1) तद्धिताः (4.1.76) प्राग्दीव्यतोऽण् (4.1.83) समर्थानां प्रथमाद्वा (4.1.82)** इत्येतान्यधिक्रियन्ते।

अस्य देवता अस्मिन् इत्यर्थे अपोनप्तृ तथा अपान्नप्तृ शब्दाभ्याम् घप्रत्ययः तथा एतयोः अपोनप्तृ-अपान्नप्तृ इत्यादेशौ च यथाक्रमं निपात्येते इति सूत्रार्थः।

अपोनपात् अस्य देवता इति विग्रहे अपोनपात् + सु इति विग्रहे प्रकृतसूत्रेण प्रकृतेः अपोनप्तृ इत्यादेशे निपातिते घप्रत्ययेऽनुबन्धलोपे **आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्** (7.1.2) इत्यनेन घकारस्य इयादेशे अपोनप्तृ + इय इति स्थिते **इको यणचि (6.1.77)** इति यणादेशे अपोनप्त्रिय इति स्थिते शब्दाधिकारकार्ये अपोनप्त्रियम् भवति।

अपान्नपात् अस्य देवता इति विग्रहे अपोन्नपात् + सु इति विग्रहे प्रकृतसूत्रेण प्रकृतेः अपोन्नप्तृ इति आदेशे निपातिते घप्रत्यये पूर्ववत्कार्ये अपान्नप्त्रियम् इति भवति।

## 4. छ च 4.2.28

छ इति लुप्तप्रथमान्तनिर्देशः। च इति अव्ययम्। अत्र **साऽस्य देवता (4.2.24)** इति सूत्रम्, **अपोनप्त्रपान्नप्तृभ्यां घः** (4.2.27) इत्यतः अपोनप्त्रपान्नप्तृभ्याम् इति पञ्चम्यन्तं पदञ्चानुवर्तते। अपोनप्तात् तथा अपान्नप्तात् इत्येते द्वे देवतयोः नाम्नी।

अस्य देवता अस्मिन् अर्थे अपोनप्तृ-अपान्नप्तृ इति शब्दाभ्याम् छ-प्रत्ययः, तथा एतयोः अपोनप्तृ-अपान्नप्तृ इत्यादेशौ यथाक्रमं निपात्यते इति सूत्रार्थः।

अपोनपात् अस्य देवता इति विग्रहे अपोनपात् + सु इति स्थिते प्रकृतसूत्रेण छ-प्रत्यये प्रकृतेः अपोनप्तृ इत्यादेशे निपातितेऽनुबन्धलोपे प्रत्ययादेः घकारस्य **आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्** (7.1.2) इत्यनेन ईयादेशे अपोनप्तृ + ईय इति स्थिते **इको यणचि (6.1.77)** इति यणादेशे अपोनप्त्रीय इति स्थिते स्वादिकार्ये अपोनप्त्रीयम् भवति। एवम् अपान्नप्त्रीयम्।

**विशेषः**

**अपोनप्त्रापान्नप्तृभ्याम् घच्छौ** इत्येव एकयोगे कर्तव्ये **अपोनप्त्रपान्नप्तृभ्यां घः** (4.2.27) इति **छ च** (4.2.28) इति योगविभागः किमर्थम् इति शङ्कायामुच्यते - योगविभागो यथासंख्यनिवृत्त्यर्थः। अर्थात् यदि आचार्यः **"अपोनप्तृ-अपान्नप्तृभ्याम् घछौ"** इति अवदिष्यत्, तर्हि यथासङ्ख्यत्वात् अपोनप्तृ-अपान्नप्तृ इति शब्दाभ्यां क्रमेण घ-छ प्रत्ययोः विधानम् अभविष्यत्। परन्तु अत्र द्वाभ्यामपि शब्दाभ्याम् उभावपि प्रत्ययौ विधातव्यौ इत्यतः स्पष्टनिर्देशार्थम् अत्र योगविभागः कृतः।

## 5. पितृव्यमातुलमातामहपितामहाः 4.2.36

पितृव्यश्च मातुलश्च मातामहश्च पितामहश्च इति द्वन्द्वे पितृव्यमातुलमातामहपितामहाः इति प्रथमाबहुवचनान्तं पदम्। अत्र **प्रत्ययः (3.1.1) परश्च (3.1.2) आद्युदात्तश्च (3.1.3) ङ्याप्प्रातिपदिकात् (4.1.1) तद्धिताः (4.1.76) प्राग्दीव्यतोऽण् (4.1.83) समर्थानां प्रथमाद्वा (4.1.82)** इत्येतान्यधिक्रियन्ते।

पितृव्य, मातुल, मातामह, पितामह इत्येते शब्दाः निपात्यन्ते इति सूत्रार्थः।

पितुः यः भ्राता सः पितृव्यः इति नाम्ना ज्ञायते। अयं शब्दः यद्यपि पाणिनिमहर्षिभिः निपातितः, तथापि वार्त्तिककारेण अस्य व्युत्पत्यर्थं **पितुर्भ्रातरि व्यत्** इति वार्त्तिकं विरचितम्। अनेन पितुर्भ्राता इत्यर्थे निर्देशे कर्तव्ये पितृ-शब्दात् व्यत्प्रत्यये तकारस्यानुबन्धलोपे शब्दाधिकारकार्ये पितृव्यः इति सिद्ध्यति।

मातुः यः भ्राता, सः मातुल इति नाम्ना ज्ञायते। प्रकृतसूत्रेण निपातिते सत्यपि वार्तिककारेण तच्छब्दसिद्ध्यर्थं **मातुर्डुलच्** इति वार्तिकं विरचितम्। तथा हि मातृ-शब्दात् डुलच्-प्रत्यये कृते मातृ + डुलच् इति स्थिते डकारचकारयोः इत्संज्ञायाम् अनुबन्धलोपे मातृ + उल इति स्थिते **टेः (6.4.143)** इति टिसंज्ञकस्य लोपे मात्+उल इति शब्दाधिकारकार्ये मातुलः इति शब्दः सिद्ध्यति।

मातुः पिता मातामहः। तथा पितुः पिता पितामहः इति नाम्ना ज्ञायते। वर्तमानसूत्रेणैव निपातिते सत्यपि वार्तिककारः **मातृपितृभ्यां पितरि डामहच्** इति वार्त्तिकेन मातृशब्दात् डामहच्प्रत्ययेऽनुबन्धलोपे **टेः** (6.4.143) इति टिसंज्ञकस्य लोपे शब्दाधिकारकार्ये मातामहः इति साधयति। तथैव पितामहः इति शब्दः।

अत्र वार्त्तिककारः मातामही तथा पितामही एतयोः शब्दयोरपि व्युत्पत्तिं दर्शयति। अनेन वार्त्तिकेन मातुः माता इत्यस्मिन् अर्थे **मातरि षिच्च** इति वार्तिकेन डामहच्-प्रत्ययेऽनुबन्धलोपे **टेः** (6.4.143) इति टिसंज्ञकस्य लोपे मातामह इति

स्थिते प्रातिपदिकसंज्ञायां स्त्रीत्वे विवक्षिते प्रत्ययस्य षित्वात् **षिद्गौरादिभ्यश्च** (4.1.41) इत्यनेन ङीष्-प्रत्यये मातामही इति सिद्ध्यति। तथैव पितामही शब्दोऽपि।

## 6. कौपिञ्जलहास्तिपदादण् 4.3.132

कौपिञ्जलश्च हास्तिपदश्च अनयोः समाहारः इति समाहारद्वन्द्वे कौपिञ्जलहास्तिपदं, तस्मात् कौपिञ्जलहास्तिपदात्। पञ्चम्येकवचनान्तं पदम्। अण् इति प्रथमैकवचनान्तं पदम्। अत्र **प्रत्ययः (3.1.1) परश्च (3.1.2) आद्युदात्तश्च (3.1.3) ङ्याप्प्रातिपदिकात् (4.1.1) तद्धिताः (4.1.76) समर्थानां प्रथमाद्वा (4.1.82)** इत्येतान्यधिक्रियन्ते। अत्र **तस्येदम् (4.3.120)** इति सूत्रमनुवर्तते।

तस्येदम् इति अर्थे कौपिञ्जलहास्तिपदौ इत्येतौ अण्प्रत्ययान्तौ निपात्येते इति सूत्रार्थः।

कुपिञ्जलस्य अपत्यम् इति विग्रहे कुपिञ्जल ङस् इति स्थिते प्रकृतसूत्रेण अण्प्रत्यये निपातिते अनुबन्धलोपे कौपिञ्जलः इति स्थिते कौपिञ्जलस्य इयम् इति अर्थे **गोत्रचरणाद् वुञ्** इति प्राप्तस्य वुञः अपवादत्वेन प्रकृतसूत्रेण अण्प्रत्यये कौपिञ्जलः इति सिद्ध्यति। यथा आह सिद्धान्तकौमुद्याम् - **कुपिञ्जलस्यापत्यम्। इहैव निपातनादण् तदन्तात्पुनरण्। कौपिञ्जलः।**

हस्तिनः पादौ इव पादौ यस्य इति बहुव्रीहौ उत्तरपदे लोपे च हस्तिपादः इति सिद्धे हस्तिपादस्यापत्यम् इति विग्रहे हस्तिपाद + ङस् इति स्थिते **अत इञ् (4.1.9 5)** इति प्राप्ते अपवादत्वेन प्रकृतसूत्रेण अण्प्रत्यये पादस्य पदादेशे च निपातिते अनुबन्धलोपे शब्दाधिकारकार्ये हास्तिपादः इति सिद्ध्यति।

## 7. परिपन्थं च तिष्ठति 4.4.36

परिपन्थम् इति द्वितीयैकवचनान्तं पदम्। च इति अव्ययम्। तिष्ठति इति क्रियापदम्। अत्र **तत् प्रत्यनुपूर्वमीपलोमकूलम्** (4.4.28) इत्यतः तत् इति द्वितीयैकवचनान्तं पदं, **पक्षिमत्स्यमृगान् हन्ति** (4.4.35) इत्यतः हन्ति इति क्रियापदञ्च अनुवर्तते। अत्र पूर्ववदेव अधिकाराः।

तिष्ठति तथा हन्ति एतयोः अर्थयोः द्वितीयासमर्थात् परिपन्थ शब्दात् ठक्प्रत्ययः भवति इति सूत्रार्थः।

पन्थानम् वर्जयित्वा अस्मिन् अर्थे अव्ययीभावसमासे परिपन्थम् इति अव्ययं सिद्ध्यति। पन्थानम् व्याप्य इत्यर्थे प्रादितत्पुरुषसमासं कृत्वा परिपन्थ इति प्रातिपदिकं सिद्ध्यति। एवं प्रकारद्वयेन तस्य व्याख्यानं क्रियते।

परिपन्थं अर्थात् पन्थानं वर्जयित्वा व्याप्य वा तिष्ठति सः पारिपन्थिकः चौरः। चौरकार्यार्थं मार्गस्य मध्ये एव न तिष्ठति, मार्गात् बहिः स्थित्वा पथिकान् दृष्ट्वा आक्रमणं करोति, सः पारिपन्थिकः इत्युच्यते। तथैव, मार्गम् व्याप्य अवरुद्ध्य स्थित्वा पथिकम् अग्रे न गमयति सोऽपि पारिपन्थिकः एव।

वस्तुतः परिपन्थः इत्ययम् शब्दः न साधुः। पन्थानं व्याप्य वर्जयित्वा वा इत्यस्मिन् अर्थे परिपथः इति शब्दः जायते, न हि परिपन्थः। तथापि वर्तमानसूत्रे परिपन्थः इत्येव शब्दप्रयोगः कृतः अस्ति। अतः अयम् प्रयोगः निपातितः अस्ति इति ज्ञायते। अस्मिन् सूत्रे तत् इति द्वितीयासमर्थः अनुवर्तते। अस्यां स्थितौ परिपन्थशब्दस्यापि द्वितीया किमर्थम् कृता, पञ्चमी

किमर्थम् न इति पृच्छायां काशिकाकारः वदति– **समर्थविभक्तिप्रकरणे पुनर्द्वितियोच्चारणं लौकिकवाक्यप्रदर्शनार्थम्**[3] इति। अर्थात् अत्र द्वितीयायाः प्रयोगेण ज्ञायते यत् परिपन्थः इदम् निपातनम् लौकिकवाक्येषु अपि भवितुम् अर्हतीति तदाशयः। अतः परिपन्थम् गच्छति, परिपन्थम् पश्यति एतादृशाः प्रयोगाः अपि समीचीनाः।

## 8. संज्ञायां धेनुष्या 4.4.89

संज्ञायाम् इति सप्तम्येकवचनान्तं पदम्। धेनुष्या इति प्रथमैकवचनान्तं पदम्। अत्र **प्रत्ययः (3.1.1) परश्च (3.1.2) आद्युदात्तश्च (3.1.3) ङ्याप्प्रातिपदिकात् (4.1.1) तद्धिताः (4.1.76) प्राग्घिताद्यत् (4.4.75) समर्थानां प्रथमाद्वा (4.1.82)** इत्येतान्यधिक्रियन्ते।

संज्ञायाः विषये धेनुष्याशब्दः निपात्यते इति सूत्रार्थः।

यत्र कश्चन धनहीनः कस्माच्चित् धनिकात् ऋणरूपेण धनं स्वीकरोति। "यावत् ऋणमुक्तिः न स्यात् तावत् मम धेनोः दुग्धम् स्वीकुरु" इति उक्त्वा स्वस्य धेनुं दुग्धनिष्कासाय धनिकाय अर्पयति, तत्र तादृश्याः धेनोः धेनुष्या इति संज्ञा भवति। यथा काशिकाकारः वदति – **या धेनुः उत्तमर्णाय (धनिकाय) ऋणप्रदानात् दोहनार्थम् दीयते, सा धेनुष्या**।

या धेनुः उत्तमर्णाय ऋणप्रदानात् दोहनार्थम् दीयते सा धेनुः इति विग्रहे धेनु + सु इति स्थिते प्रकृतसूत्रेण यप्रत्यये षुगागमे च निपातिते शब्दाधिकारकार्ये स्त्रीत्वे **अजाद्यतष्टाप् (4.1.4)** इति टापि धेनुष्या इति सिद्ध्यति। यथा **धेनुष्यां भवते ददामि** इति वाक्यव्यवहारः। यथा कौमुद्याम् उच्यते – **धेनुशब्दस्य षुगागमो यप्रत्ययश्च स्वार्थे निपात्यते संज्ञायाम्**[4] इति।

**समीक्षा-** धेनुष्यशब्दे विद्यमानः अन्तिमः स्वरः यकारोत्तरः अकारः **आद्युदात्तश्च (3.1.3)** इत्यनेन उदात्तः अस्ति। अतः यत् इत्यस्य अधिकारस्य वर्तमानत्वेऽपि स्वरविशेषार्थम् धेनुष्याशब्दविषये यत्प्रत्ययस्य स्थाने यप्रत्ययो निपातितः। यत्-प्रत्यये सति शब्दावयवाकारस्य **तित्स्वरितम्** (6.1.185) इत्यनेन स्वरितः स्यात्। अस्माकं तु इष्टम् उदात्तत्वं यप्रत्यये भवति । अत एव अत्र यप्रत्ययविधानं क्रियते। अतः काशिकाकारः वदति – **अन्तोदात्तः अपि हि अयम् इष्यते**[5]**।**

## • परिशीलितग्रन्थसूची


1. संस्कृत व्याकरण शास्त्र का इतिबहास (श्री युधिष्ठरमिमांसकः) – चौखम्बा पब्लिशर्स, वाराणसी, उ.प्र. 2003
2. वैयाकरणसिद्धान्तकौमुदी ( भट्टोजिदीक्षितः) – चौखम्बा विद्याभवन, वाराणसी, उ.प्र. 2008
3. वैयाकरणभूषणसारः (कौण्डभट्टः) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, उ.प्र.1998
4. परिभाषेन्दुशेखरः (नागेशभट्टः) चौखम्बा सुरभारती प्रकाशन, वाराणसी, उ.प्र. 1997
5. काशिका ( वामनजयादित्यौ) – चौखम्बा संस्कृत सीरिज आफिस, वाराणसी, उ.प्र. 1972 न्यासव्याख्या (जिनेन्द्रबुद्धिः), पदमञ्जरीव्याख्या (हरदत्तः)
6. अष्टाध्यायी सहजबोध (डाँ.पुष्पा दीक्षित) प्राच्यविद्या-प्रकाशन एवं पुस्तक – विक्रेता, 2011


---

[3] अ. सू 4.4.36

[4] सि कौ सू.क्र 1641

[5] अ. ध्या. 4.4.89

7. काशिका का समालोचनात्मक अध्ययन( डा.रघुवीर वेदालङ्कार) नाग पब्लिशर्स, दिल्ली, 1997
8. काशिका पदमञ्जरी न्याससहिता प्र.भाग:( डा.रघुवीर वेदालङ्कार) प्राच्यविधद्याप्रतिष्ठाम्, दिल्ली,1997
9. काशिका प्रकाश व्याख्योपेता प्र.भाग:( डाँ.नारायणमिश्र:) चौखम्बा संस्कृत संस्थान, वाराणसी, 1928
10. काशिका भावबोधिनी सहिता तृ.भाग:( डाँ.जयशरलाल त्रिपाठी) तारा प्रिटिंग वर्क्स, वाराणसी, 1986
11. वाक्यपदीयम् भर्तृहरि:,सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:, वाराणसी,1997
12. व्याकरणसिद्धान्तसुधानिधि:( विश्वेश्वरसूरि: ), राजस्थानपत्रिका,जोधपूर,1995
13. वैयाकरणसिद्धान्तकौमुदी ( गोविन्दाचार्य: ) चौखम्बा सुरभारती प्रकाशन, वाराणसी,2016
14. अष्टाध्यायी सहजबोध( डाँ.पुष्पा दीक्षित) प्रतिभा प्रकाशन्, दिल्ली, 2011